राजः काश्यपगोत्रोऽप्यस्ति तद्राजस्विगोत्रकः ।
श्रूयन्ते च आमदग्न्यगोत्रा देशान्तरे धराः ॥
बहवोऽपि भरद्वाजगोत्रजाः सन्ति रचिताः ।
इन्द्रादित्यौ परौ यौ द्वौ वैद्यौ गोत्रास्तयोरिमे ॥
इन्द्रस्य काश्यपो गोत्र एक एव प्रकीर्त्तितः ।
आदित्यानामिमौ गोत्रावादित्यकौशिकौ
स्मृतौ ॥
पञ्चाशदेते विख्यातास्तस्माद्गोत्रा भिषक्कुले ।
यत्तु देशान्तरे गोत्रमन्यत् किमपि च श्रुतम् ।
एतादीनां न तत् प्रोक्तमप्रसिद्धमतीव तत् ॥" *
अथ पञ्जिकान्तरोक्तराढ़ीयवैद्यकुलाष्टकीय-गोत्रसंख्याश्रेष्ठत्वादि लिख्यते ।
"काश्यपाद्दुर्बसेनस्य गोत्राण्यष्टौ भवन्ति
च ।
शक्तिधन्वन्तरी श्रेष्ठौ मध्यौ वैश्वानरात्यकौ ।
मौद्गल्यकौशिकौ तथात्रेय आङ्गिरसोऽधमाः ॥"
अथ राढ़ीयाद्यष्टवैद्यानां प्रवरानाह ।
"प्रवराः पञ्च सेनानां धन्वन्तरिकुलोद्भवाम् ।
विनिर्द्दिष्टा यथा ते च धन्वन्तर्य्यपराशरौ ॥
नैध्रुवश्चाङ्गिरसो बार्हस्पत्य इति क्रमात् ।
शक्तिगोत्रे त्रयः शक्तिपराशरवशिष्ठकाः ॥
प्रवराः पञ्च दासानामौर्व्वच्यवनभार्गवाः ।
जामदग्न्यश्चाप्नुवानः प्रोक्ता मौद्गल्यगोत्रजाः ॥
गुप्तानां त्रय एवैते काश्यपोऽप्यपसारकः ।
नैध्रुवोऽमी प्रवराः काश्यपान्वयसम्भुवाम् ॥
दत्ते त्रयं कौशिकानां शाण्डिल्यासितदेवलाः ।
सथात्रेयो वशिष्ठश्च आत्रेयश्चेति ते त्रयः ॥
दत्तानां प्रवरा एते दत्तात्रेयकुलोद्भुवाम् ।
आत्रेयगोत्रजातानां देवानाञ्च तथा त्रयः ॥
आत्रेय आङ्गिरसको बार्हस्पत्य इति क्रमात् ।
करे भरद्वाजगोत्रे त्रयोऽमी प्रवराः स्मृताः ॥
भरद्वाजो भार्गवश्च च्यवनश्च क्रमादमी ।
राजवंशे वात्स्यगोत्रे कथिताः प्रवरास्त्रयः ॥
वात्स्योऽसितस्तथा मार्कण्डेय एवं क्रमादिति ।
अथ कौशिकगोत्रस्य सोमस्य प्रवरास्त्रयः ॥
कौशिकः काश्यपश्चैव भार्गवश्चेत्यमी क्रमात् ।
सेनादीनामनुक्ता ये आद्यगोत्रादिसम्भुवाम् ॥
प्रवरास्तेऽपि विज्ञेयास्तत्तत्कुलभुवां सुखात् ।
नन्द्यादीनां वरेन्द्रेषु चतुर्णां प्रवराश्च ये ।
विज्ञेयास्ते च विखिलास्तेषां कुलभुवां सुखात् ॥"
इति वैद्यानां प्रवराः ॥ * ॥
अथ वैद्येषु राढ़ीयादिकथनम् ।
"सेनो दासश्च गुप्तश्च दत्तो देवः करस्तथा ।
राजसोमावपीत्यष्टौ राढ़ीयाः परिकीर्त्तिताः ॥
नन्दिश्चन्द्रो धरः कुण्डो रक्षितश्चेति पञ्च ये ।
ते वरेन्द्रेषु विख्याता दासदत्तकरा अपि ॥
राढ़ीया भिषजो ये ये प्रायस्ते वङ्गगा अपि ।
नन्द्यादयो महाराष्ट्रे निवसन्ति च केचन ॥"
तथा च पञ्जिकान्तरे ।
"सेनो दासश्च गुप्तश्च पञ्च दत्तादयस्तथा ।
अष्टौ राढ़ासु विख्याताः प्रायोऽमी वङ्गगा
अपि ॥"

तथान्यत्र ।
"नन्दिचन्द्रधरदत्तरक्षिता-
स्ते खनामनि वरेन्द्रविश्रुताः ।
सौजिपूरुष इहैव वक्ष्यते
तत्कुलं खलु वरेन्द्रजं पुनः ॥"
तथा हि नारायणदासोऽन्तरङ्गस्थानस्य ।
"दासो दत्तो धरश्चैव नन्दिकुण्डौ करस्तथा ।
चन्द्रश्च रक्षितश्चेति वरेन्द्रकुलमष्टकम् ॥" इति ॥
तथान्यत्र ।
"अष्टौ सेनादयो राढ़े वङ्गेष्वपि वसन्त्यमी ।
नन्द्यादयो महाराष्ट्रे शुभपद्धतयोऽपि च ।
केचिच्चान्या परिख्याता दृष्टा देशान्तरेष्वपि ॥"
इति ॥
"सम्बन्धः श्रूयते सर्व्वैरेकदेशनिवासिनोः ।
निन्द्यते किल सम्बन्धो भिन्नदेशनिवासिनोः ॥"
इति वैद्येषु राढ़ीयादिकथनम् ॥ * ॥
अथ सेनादीनां पूर्व्वस्थानमाह ।
"श्रीकाञ्चीशा गोनगरं करङ्कोठ एव च ।
मोरशासनकान्तारौ समाशुस्थानमेव च ॥
मेटग्रासनमप्यन्यो यासग्रामस्तथैव च ।
अष्टानां सेनमुख्यानां राढ़ायां स्थानमष्टकम् ॥"
तथाह दुर्ज्जयः ।
"काञ्ची गोरं करङ्कश्च मोरकान्तासमाशुकाः ।
मेटग्री मालश्च राढ़ायां वैद्यानां कुलमष्टकम् ॥"
इति वैद्यानां पूर्व्वस्थानकथनम् ॥ * ॥
अथ स्थानभेदेन सेनादिभेदमाह ।
"ऊनविंशतिधा सेना अष्टाविंशतिधा पुरम् ।
भवन्ति भेदैनैतेषां वक्ष्यते कुललक्षणम् ॥
एको विनायकः सेनो भेदेन नवधाभवत् ।
मालञ्चो धलहण्डीयः खानाजः सेनहाटिकः ॥
नारहट्टो गिरोलीयस्तथा मङ्गलकोठजः ।
रायिग्रामी वैतलीयो नव वैनायका अमी ॥
विशेषतो विनिर्दिष्टा ज्ञेयाश्चान्यस्थलोद्भवाः ।
सामान्यस्थानकथने सम्बन्धभावसौ तथा ।
सर्व्वेषामेव वैद्यानामितरेषामयं क्रमः ॥"
इति विनायकसेनवंशनिर्णयः ॥
"एकः पुनर्गयीसेनो भेदेनैव चतुर्व्विधः ।
विषपाड़ाभवः श्रेष्ठस्तिकायिपुरजस्तथा ।
अन्यः कड़यिसम्भूतो धाड़ाग्रामी ततः परः ॥"
इति गयीसेनवंशनिर्णयः ॥
"एको राघवसेनोऽभूत् खण्डग्रामेऽपि विश्रुतः ।
स खण्डज इति ख्यातो नापरा तस्य च स्थली ॥"
इति राघवसेनवंशनिर्णयः ॥
"राजा विमलसेनोऽभूत् सेनभूमिकृताश्रयः ।
स सेनभूमौ विख्यातो नापरं तस्य च स्थलम् ॥"
इति राज्ञो विमलसेनस्य वंशनिर्णयः ॥
"पात्रदामोदरः सेनः पात्रः शिखरभूपतेः ।
असौ शिखरभूजातो नापरं तस्य च स्थलम् ॥"
इति पात्रदामोदरवंशनिर्णयः ॥
"विनसेनोऽपि यस्त्वेको धलभूमिकृताश्रयः ।
स एव धलभूमिष्ठो नापरा तस्य च स्थली ॥"
इति विनसेनवंशनिर्णयः ॥

"सप्तमो दुर्बसेनो यो वङ्गभूमौ प्रतिष्ठितः ।
हाण्डियाग्रामसम्भूतस्तन्नाम्ना तस्य तत्कुलम् ॥"
इति हाण्डियादुर्बसेनवंशनिर्णयः ॥
इति धन्वन्तरिगोत्रजातानां सप्तविधानां सेनानां भेदेनाष्टादशप्रकारनिर्णयः ॥
"श्रीवत्ससेनप्रमुखाः षड़मी शक्तिगोत्रजाः ।
भेदेन सप्तधा ज्ञेया यथाक्रममभी पुनः ॥
एकः श्रीवत्ससेनोऽभूत्तेहट्टग्रामविश्रुतः ।
तेहट्टज इति ख्यातो नापरं तस्य च स्थलम् ॥"
इति श्रीवत्ससेनवंशनिर्णयः ॥
"एकः शियालसेनोऽसौ भेदेन द्विविधोऽभवत् ।
पोड़ागाछाभवः श्रेष्ठः परः पोखरियाभवः ॥"
इति शियालसेनवंशनिर्णयः ॥
"एको यः पुरुसेनोऽभूद्भुठिनागड़िमाश्रितः ।
भूठिनागड़िजत्वेन ख्यातोऽसौ नापरं स्थलम् ॥"
इति पुरुसेनवंशनिर्णयः ॥
"चन्द्रसेनोऽपरस्त्वेकश्चन्द्रदीपनिवासकृत् ।
शक्तिगोत्रसमुद्भूत इदीलपुरमाश्रितः ॥"
इति चन्द्रसेनवंशनिर्णयः ॥
"एको सुधीरसेनोऽसौ स्वर्णपीठीनृपाश्रयात् ।
स एव स्वर्णपीठीति विख्यातो मल्लभूभवः ॥"
इति सुधीरसेनवंशनिर्णयः ॥
"रामसेनः परस्तस्यैवान्तर्भूतो बभूव यः ।
स मल्लभूमिवसतौ विदितानेकपौरुषः ॥"
इति शक्तिगोत्रजातानां श्रीवत्ससेनप्रमुखानां षसां सप्तप्रकारनिर्णयः ॥
"आद्यसेनस्तु षड़बीजी भेदेन विविधोऽभवत् ।
नपाड़ासम्भवस्त्वेकः शाजग्रामभवोऽपरः ॥
मानकरीय एवान्यस्त्रय आद्याः प्रकीर्त्तिताः ।
आद्यर्षिगोत्रसम्भूताः स्वतन्त्राः सर्व्व एव हि ॥"
इति सकलसेनानां भेदनिर्णयः ॥ * ॥
अथ दासानां भेदमाह ।
"पञ्चदशविधा दासास्तेऽमी विंशतिधा पुनः ।
एकः पुनश्चायुदासो भेदेन द्विविधोऽभवत् ।
एकस्तेहट्टसम्भूतो मालिकाहारजः परः ॥"
इति चायुवंशे द्विविधनिर्णयः ॥
"पन्थदासः पुनस्त्वेको भेदेन पञ्चधाभवत् ।
वालिगाछीभवश्चैकः परो मखलजानिकः ।
मौड़म्बरभवः पालिग्रामजः पाञ्चनौरजः ॥"
इति पन्थवंशे पञ्चविधनिर्णयः ॥
"एकोऽपरः काशुदासो वङ्गभूमौ प्रतिष्ठितः ।
कोग्रामीय इति ख्यातो दासो मौद्गल्यगोत्रजः ॥"
इति काशुदासवंशनिर्णयः ॥
भोयीदासोऽपि तत्पुत्रौ ख्यातौ दीघलकेकरौ ।
अमी त्रयो वङ्गभूमौ प्रसिद्धाः सर्व्व एव हि ॥"
इति भोयीदासस्य तत्पुत्रयोश्च वंशनिर्णयः ॥
"एको वराहदासोऽसौ चौहारिग्रामवासकृत् ।
स चौहारिजदासोऽपि मतो मौद्गल्यगोत्रजः ॥"
इति चौहारीयवराहदासवंशनिर्णयः ॥
"नृसिंहनामदासौ द्वौ वङ्गदेशे प्रतिष्ठितौ ।
तौ वङ्गजाविति ख्यातौ कुलकार्य्यपरायणौ ॥"
इति नृसिंहदासयोर्वंशनिर्णयः ॥